**दिनाङ्क :- 12.09.2026**
**प्रात: - 06:55**

## अथवार्ता:

### ब्रिक्स्-शिखरसम्मेलनम्

अष्टादशतमं ब्रिक्स्-शिखरसम्मेलनम् अद्य नवदिल्ल्याः भारतमण्डपम इत्यत्र आरप्स्यते। द्विदिवसीयम् इदं भव्यं सम्मेलनम् एकादश-प्रमुखोदयमानानां विकासशीलानां च अर्थव्यवस्थानां प्रतिनिधीन् परस्परं संयोजयिष्यति।

उच्चस्तरीयस्य अस्य सम्मेलनस्य अवसरे ब्रिक्स्-सदस्यदेशानां नेतारः वैश्विकशासनं, बहुपक्षवादः, व्यापारः, निवेशः, प्रौद्योगिकी, खाद्योर्जासुरक्षा, स्वास्थ्यसेवा, महत्त्वपूर्णाः आपूर्तिशृङ्खलाः चेत्येतेषु प्रमुखेषु विषयेषु चर्चां करिष्यन्ति। इदं शिखरसम्मेलनं भारतस्य अस्य वर्षस्य ब्रिक्स्-अध्यक्षतायाः अन्तर्गतम् आयोज्यते। अस्य सम्मेलनस्य विषयः अस्ति- "सुदृढतायै, नवाचाराय, सहकाराय सततविकासाय च निर्माणम्"।

अस्मिन् महत्त्वपूर्णे शिखरसम्मेलने अनेके प्रमुखाः विश्वनेतारः सहभागं करिष्यन्ति। प्रधानमन्त्रिणा नरेन्द्रमोदिना सह रूसस्य राष्ट्रपतिः व्लादिमीर-पुतिन्, चीनस्य राष्ट्रपतिः षी चिनफिङ्ग्, दक्षिणाफ्रिकादेशस्य राष्ट्रपतिः सिरिल-रामाफोसा, मिस्रस्य राष्ट्रपतिः अब्दुल् फत्ताह् अस्सीसी, इण्डोनेशियादेशस्य राष्ट्रपतिः प्राबोवोसुबियान्तो तथा ईरानस्य राष्ट्रपतिः मसूद् पेज़ेश्कियन् अपि सम्मेलने सम्मिलिताः भविष्यन्ति। शिखरसम्मेलनस्य प्रारम्भः ब्रिक्स्-सदस्यदेशेभ्यः 'समावेशिनः वैश्विकशासनस्य बहुपक्षवादस्य च सुदृढीकरणम्' इति विषयम् आधृत्य आयोजितेन संवृत-सत्रेण भविष्यति। प्रधानमन्त्री नरेन्द्रमोदी अद्य शिखरसम्मेलनस्य अन्तराले ब्रिक्स्-नेतृभिः सह अनेकाः द्विपक्षीयवार्ताः करिष्यति।

### ब्रिक्स्-नेतृणाम् आगमनम्

अष्टादशतमे ब्रिक्स्-शिखरसम्मेलने भागं ग्रहीतुम् अनेके वैदेशिकनेतारः वरिष्ठाधिकारिणश्च नवदिल्ल्यां प्राप्तवन्तः। इण्डोनेशियादेशस्य राष्ट्रपतिः प्राबोवोसुबियान्तो ह्यः रात्रौ राष्ट्रियराजधानीं प्राप्तवान्। अबुधाबी-देशस्य युवराजः शेख्-खालिद्-बिन्-मोहम्मद्-बिन्-जायद्-अल्-नह्यान्, मलेशियादेशस्य प्रधानमन्त्री अनवर इब्राहिम्, मिस्रस्य राष्ट्रपतिः अब्दुल् फत्ताह् अस्सीसी तथा इथियोपियादेशस्य प्रधानमन्त्री आबी अहमद अली च ह्यः सायङ्काले नवदिल्ल्यां प्राप्तवन्तः।

### ब्रिक्स् - व्यापारमञ्चम्

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् ब्रिक्स्-देशाः वैश्विकनवाचारस्य अथ समाधानानां च महत्त्वपूर्णकेन्द्ररूपेण उद्भवन्ति। ह्यः सायङ्काले नवदिल्ल्याः भारतमण्डपम इत्यत्र ब्रिक्स्-व्यापारमञ्चस्य नेतॄणां सत्रं सम्बोधयन् प्रधानमन्त्री उक्तवान् यत् ब्रिक्स्-देशानाम् आर्थिकसामर्थ्यं विश्वस्य अन्यभागानाम् अपेक्षया प्रायः द्विगुणितगत्या वर्धितम् अस्ति। सुरक्षितसामुद्रिकमार्गाणां महत्त्वं प्रतिपादयन् प्रधानमन्त्री उक्तवान् यत् वैश्विकव्यापारः तदैव अग्रे गन्तुं शक्नोति, यदा सामुद्रिकमार्गाः सुरक्षिताः भवन्ति, आपूर्तिमार्गाः मुक्ताः तिष्ठन्ति अथ नाविकाः च सुरक्षिताः भवन्ति।

**मोदी - पुतिन मध्ये द्विपक्षीयवार्ता**

प्रधानमन्त्री नरेन्द्रमोदी रूसस्य राष्ट्रपतिः व्लादिमीर-पुतिन् च ह्यः रक्षा, ऊर्जा, अन्तरिक्ष, कौशलगतिशीलता, जनानां मध्ये परस्परसम्पर्कः चेत्येतेषु सदृशेषु क्षेत्रेषु द्विपक्षीयसहकारस्य प्रगतेः समीक्षां कृतवन्तौ। नवदिल्ल्यां सम्पन्नायां द्विपक्षीयवार्तायाम् उभौ नेतारौ पश्चिमैशियायां कृष्णसागरक्षेत्रे च प्रवर्तमानान् सङ्घर्षान् समेत्य परस्परहितसम्बद्धेषु प्रमुखेषु क्षेत्रीय-वैश्विक-विषयेषु स्वकीयविचारान् प्रकटितवन्तौ। प्रधानमन्त्री मोदी पुनः प्रतिपादितवान् यत् सङ्घर्षाणां समाधानस्य मार्गः संवादेन एव प्रशस्तः भवति तथा भारतं शान्तिप्रयासेषु साहाय्याय तत्परम् अस्ति।

**॥ इति वार्ताः॥**